# Shri Ganesha Stuti Pulahakrita

# પુલહકૃતા શ્રીગણેશસ્તુતિઃ

## Document Information

Text title : Shri Ganesha Stuti Pulahakrita

File name : gaNeshastutiHpulahakRRitA.itx

Category : ganesha, mudgalapurANa, stuti

Location : doc_ganesha

Proofread by : Yash Khasbage, Preeti Bhandare

Description/comments : mudgalapurANaM dvitIyaH khaNDaH | adhyAyaH 18 | 2.18 7-24||

Latest update : June 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 5, 2024

*sanskritdocuments.org*

# પુલહકૃતા શ્રીગણેશસ્તુતિઃ

॥ શ્રીગણેશાય નમઃ ॥

પુલહ ઉવાચ ।

નમસ્તે વિઘ્નરાજાય ભક્તાનાં વિઘ્નહારિણે ।

વિઘ્નદાત્રે હ્યભક્તાનાં ગણેશાય નમો નમઃ ॥ ૭॥

બ્રહ્મણે બ્રહ્મરૂપાય નિરાકારાય તે નમઃ ।

સાક્ષિણે સર્વસંસ્થાયાનાદિસિદ્ધાય તે નમઃ ॥ ૮॥

અનામયાય દેવાયાઽપ્રતર્ક્યાય મહૌજસે ।

વક્રતુણ્ડાય વૈ તુભ્યં હેરમ્બાય નમો નમઃ ॥ ૯॥

સ્વાનન્દવાસિને તુભ્યં ભક્તસંરક્ષકાય ચ ।

યોગાનાં પતયે ચૈવ યોગદાયિન્નમો નમઃ ॥ ૧૦॥

શાન્તાય શાન્તરૂપાય શાન્તીનાં પતયે નમઃ ।

ભક્તેભ્યઃ શાન્તિદાત્રે ચ યોગશાન્તાય તે નમઃ ॥ ૧૧॥

નાનાવતારરૂપાય જગદાધારમૂર્તયે ।

સુરાસુરાણામીશાય સર્વગાય નમો નમઃ ॥ ૧૨॥

સર્વવન્દ્યાય વૈ તુભ્યં સર્વાદૌ સંસ્થિતાય ચ ।

સર્વાન્ત એકરૂપાય મધ્યે નાનાસ્વરૂપિણે ॥ ૧૩॥

આદિમધ્યાન્તહીનાય સૃષ્ટિસ્થિત્યન્તકારિણે ।

અનન્તોદરસંસ્થાય લમ્બોદર નમોઽસ્તુ તે ॥ ૧૪॥

ગજવક્ત્રાય વૈ તુભ્યં ગજાકારાય તે નમઃ ।

ગજકર્ણાય પૂર્ણાય ગજાનન નમોઽસ્તુ તે ॥ ૧૫॥

મૂષકધ્વજરૂપાય મૂષકારૂઢરૂપિણે ।

પાશાઙ્કુશધરાયૈવ સ્તુતાય ચ વિભૂતિભિઃ ॥ ૧૬॥

ચતુર્ભુજધરાયૈવ ચતુર્વર્ગમયાય ચ ।

બ્રહ્મભૂતસ્વરૂપાય દેહધારિન્નમો નમઃ ॥ ૧૭॥

યં વેદવાદિનઃ સ્તોતું વેદાઃ સાઙ્ગાશ્ચ યોગિનઃ ।

શિવવિષ્ણુમુખા દેવા ન સમર્થા ભવન્તિ વૈ ॥ ૧૮॥
તં કથં સ્તૌમિ દેવેશં યોગરૂપમયં પ્રભુમ્ ।
અતો વૈ પ્રણમામિ ત્વાં પ્રસન્નો ભવ સર્વદા ॥ ૧૯॥
વરં મે દેહિ યોગાત્મન્ તેન તુષ્ટો ભવામ્યહમ્ ।
તવ ભક્તિં દૃઢાં ઢુણ્ઢે વ્યભિચારવિવર્જિતામ્ ॥ ૨૦॥
એવમુક્ત્વા મુનિસ્તત્ર નનર્ત પ્રેમવિહ્વલઃ ।
તં ભક્તિરસસંયુક્તમુવાચ ગણનાયકઃ ॥ ૨૧॥
(ફલશ્રુતિઃ)
ગણેશ ઉવાચ ।
મદીયા સુદૃઢા ભક્તિર્વ્યભિચારવિવર્જિતા ।
ભવિષ્યતિ મહાયોગિન્ તવ ચાનન્દદાયિકા ॥ ૨૨॥
યદા મે સ્મરણં ત્વં વૈ કરિષ્યસિ મહામતે ।
તદા માં દ્રક્ષ્યસિ બ્રહ્મન્ સંસ્થિતં તવ સન્નિધૌ ॥ ૨૩॥
ભવત્કૃતં મદીયં યત્સ્તોત્રં ભક્તિપ્રદં ભવેત્ ।
ભુક્તિમુક્તિપ્રદં પ્રોક્તં શાન્તિયોગપ્રદાયકમ્ ॥ ૨૪॥

ઇતિ પુલહકૃતા શ્રીગણેશસ્તુતિઃ સમ્પૂર્ણા ॥

- ॥ મુદ્ગલપુરાણં દ્વિતીયઃ ખણ્ડઃ । અધ્યાયઃ ૧૮ । ૨.૧૮ ૭-૨૪॥

- .. mudgalapurANaM dvitIyaH khaNDaH . adhyAyaH 18 . 2.18 7-24..

Proofread by Yash Khasbage, Preeti Bhandare

*Shri Ganesha Stuti Pulahakrita*

pdf was typeset on June 5, 2024

Please send corrections to *sanskrit@cheerful.com*